~~१६६५~~

नागेशः

(एकाङ्कि रुपकम्)

७४५२

संस्कृत
नाटक
२७

धनान्यविगणय्यैव तिरस्कृत्य सुखानि च ।
चिन्तयन्ति परार्थं ये ते जयन्ति मनीषिणः ॥

श्रीलक्ष्मीवर - विद्यामन्दिर.
देवप्रयाग (...)
व्यवस्थापक- पं. ...

लेखक :—

"विद्यार्थी"

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

"काव्यदनम्" प्रकाशनस्य प्रथमः प्रकाशः

नागेशः

(एकाङ्कि रुपकम्)

धनान्यविगणय्यैव तिरस्कृत्य सुखानि च ।
चिन्तयन्ति परार्थं ये ते जयन्ति मनीषिणः ॥

श्रीलक्ष्मीधर - विद्यामन्दिर,
देवप्रयाग ([illegible])
व्यवस्थापक- पं. [illegible]

लेखक :—

"विद्यार्थी"

प्रथमावृत्तिः,	२०१६ वैक्रमे,	मूल्यम्
५०० प्रतयः	१८८१ शाके.	०.४० नवपणाः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रकाशक :—
"काव्यसदनम्" प्रकाशनम्,
देवप्रयागः, गढ़वालः ।

॥ सर्वेऽधिकारा लेखकाधीनाः ॥

मुद्रक :—
गीताधर्म प्रेसः
मिश्रपोखरा, वाराणसी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्री लक्ष्मीधर-विद्यामन्दिर,
देवप्रयाग (गढ़वाल हिमालय)
व्यवस्थापक-पं. चक्रधर जोशी

श्री-

मातृचरणेषु

यासामाशाशीर्लतायाः

फलमिदम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्राच्यपाश्चात्योभयविद्यानिष्णातानां स्वनामधन्यानाम्
वाराणसेयसंस्कृतविश्वविद्यालयस्य
प्रस्तोतृमहोदयानाम्

"शुभाशंसनम्"

साम्प्रतमपि प्रयागादनतिदूरं शृङ्गवेरपुरमनुगङ्गं विराजते। तत्रत्यमहीपालाद्रामसिंहाल्लब्धजीविको नागेशभट्टोऽधुनापि व्याकरणकान्तारकेसरीव विद्योतते। व्याकरणे साहित्ये च कृतभूरिपरिश्रमोऽयं भट्टः स्वीयया शेमुष्याऽपूर्वं किञ्चिद् वैदुष्यमवाप्य काञ्चन श्लाघ्यां ख्यातिमवापेति न तिरोहितं विदुषां समेषाम्। किन्तु तदीयमितिवृत्तमवलम्ब्य नाद्यापि कोऽपि प्रामाणिको लेखः समुपलभ्यते। निखिलं चराचरं वशीकुर्वता कालेन बहवो ह्येवं विद्या विद्वांसः कवलीकृताः, येन तेषां नामान्यपि विलुप्तानि। येषां खलु काचित्कृतिः केनापि रूपेण विजृम्भते, ते केवलं नामशेषा अद्यापि भ्राजन्ते। श्रीनागेशभट्टोऽप्येवं विध एव।

तत्र किञ्चिदुदन्तमवलम्ब्य महोत्साहेन श्रीवामदेव-भट्ट-"विद्यार्थिना" श्रीनागेशस्य दारिद्र्यदुःखं प्रस्तुत एकाङ्के साफल्येन प्रदर्शितम्। मञ्जुलया सरलातिसरलया च भाषयोपनिबद्धमिदं रूपकं नाट्यप्रणयनसम्बद्धाञ्छास्त्रीयान्नियमाननाश्रित्याप्यभिनवया कल्पनया विरोचमानं सर्वथा श्लाघ्यमेव। एवं विधा नूतनाः कृतयः सुरभारत्याः प्रसाराय सर्वथा संग्राह्याः, अतोऽत्रत्याः प्रथमप्रयासकृतास्त्रुटयः समुपेक्ष्याः।

लेखकः स्वकीये प्रयत्ने सफलः, अतो धन्यवादार्हः। अहमस्य सफलतां कामये।

कुबेरनाथ-शुक्लः

१०-१-६० एम. ए., व्याकरणाचार्यः
प्रस्तोता
वाराणसेयसंस्कृतविश्वविद्यालयस्य
वाराणसी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्री ... (faded stamp)

निवेदनीयम् :—

संस्कृतनाटकरचनाकाले रङ्गस्य कीदृशी व्यवस्थासीदिति तु प्रायोऽविदितमेव। परन्तु यानीदानीं संस्कृतनाटकानि प्राप्यन्ते, तेषु सम्भवत एकमपि नाटकमाधुनिकरङ्गानुरूपं नास्ति। फलतः संस्कृतनाटकानि दृश्यत्वापेक्षया श्रव्यत्वकोटिं भजन्ते। तत्क्षतिमभिलक्ष्य प्रवृत्तं रूपकमिदं संस्कृतनाट्यशास्त्रदायादमपि पाश्चात्यनाट्यशास्त्रसीमानं न केवलं स्पृशत्यपितु तत्रत्यान्यावश्यकानि तत्वान्यपि गृह्णाति। अतोऽस्मिन्संस्कृतनाट्यशास्त्रविरुद्धमपि किमपि सम्भाव्यते। वस्तुतस्तु शिल्पदृशा पाश्चात्यपद्धतिमेवानुसरतीदम्। तथापि स्वत्वमपि किमप्यस्त्येवेति प्राच्यपाश्चात्यपद्धत्योरयं मध्यमो मार्गः। हिन्द्यादिभाषासु पूर्वं प्रचलितोऽपि संस्कृते नवीनोऽयं प्रयोगः।

नागेशविषय ऐतिहासिकाः प्रायो मौनाः सन्ति। रूपकोपनिबद्धा घटना तेषां सम्मता स्यान्नवा स्यात्किन्तु कस्यापि महाविदुषो जीवनेऽसंघटनीयैवेति तु कथितुं न शक्यते। नागेशस्य जीवनविषयेऽनेकाः किम्वदन्त्यः चप्रलिताः सन्ति। तास्वेकामवलम्ब्य रूपकोपनिबन्धनमिदम्। नागेशपत्न्यास्तद्भ्रातुश्च नामनी काल्पनिक एव।

गुणदोषविषये तु विद्वान्स एव प्रमाणम्। रूपकमिदं यदि विदुषां मनसि स्तोकमपि मोदमापादयेत्तदा कृतार्थः स्यात्—

"काव्यसदनम्"
देवप्रयागः, गढ़वालः
मकरसंक्रान्तिः

वामदेव—"विद्यार्थी"
१५-१-६०

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पात्रपरिचयः —

१—नागेशः—सुप्रसिद्धो महावैयाकरणः ।

२—शैव्या—नागेशपत्नी ।

३—अनन्तः—शैव्याया भ्राता ।

४—रामसिंहः—शृङ्गवेरपुराधीशः ।

आमात्यो भृत्याश्च ।

अभ्यर्थना

लघुकायेऽप्यस्मिन्ग्रन्थे कार्यान्तरबाहुल्यादायसाक्षरदोषाच्च मुद्रणे बह्व्यस्त्रुट्यः संजाताः । कृपालुभिः पाठकैर्यथायथं संशोध्य पठनेनानुग्राह्यः — लेखकः ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

* वाग्देव्यै नमः *

(स्थानम् - गंगातटम् । समयः - प्रातः ।)

[यवनिकानिक्षेपेण सह रङ्गस्य दक्षिणपार्श्वेऽग्रभागादारभ्योपान्तपर्यन्तं तृणनिर्मितोटजो दृश्यते । रङ्गस्य मध्य एका वेदिका निर्मिता वर्तते, यस्या उपरि चतुर्ष्वनृजुकाष्ठदण्डेष्ववस्थितं तृणानामाच्छादनं विद्यते । तस्य चोपरिभागे तरोः शाखावलम्बमाना तिष्ठति, यस्य मूलं रङ्गस्य वामपार्श्वेऽस्ति । तरोर्निपतितैः पर्णैर्लघुकाष्ठखण्डैश्च तत्रत्या भूमिरवकीर्णा विद्यते । उटजस्य द्वारं वेदिकाभिमुखमस्ति, दर्शकाभिमुखे पार्श्वे चैको वृहद्गावाक्षोऽस्ति । उटजस्ट तृणनिर्मिता भित्तिश्च स्थाने स्थाने छिन्नेव दृश्यते । क्षितिजे वृक्षाणां सघनपङ्क्तेरुपरि सुनीलं नभो दृश्यते । तरुस्थानां पक्षिणां कलनिनादेन, भगवतो भास्वतो बालरश्मिभिरुल्लसितोऽपि वातावरणस्तत्रत्यां स्तब्धतामतिक्रमितुं न प्रभवति ।

ततः प्रविशत्युटजद्वारतो जीर्णतरां शाटिकां धारयन्ती शैव्या । ऋते शाटिकायास्तस्या वपुषि वस्त्रान्तरं नास्ति । चोलिकायाः स्थाने वक्षस्येकं जीर्णवस्त्रं बद्धमस्ति, यच्च शाटिकाया अशक्त्या स्पष्टतयैव दृश्यते । शाटिका च स्थाने स्थानेऽपरवासःखण्डैरनुस्यूता वर्तते । एवमपि च शाटिका तस्या लज्जां वारयितुं समर्था न भवति ।]

शैव्या—(शाटिकां वक्षसि साधयन्ती दीर्घं निःश्वस्य स्वगतम्)

प्रभो विश्वेश्वर, अपि नामायास्यति तादृक्प्रातः, यत्राहमन्न-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मपरिचिन्तयन्ती वैश्वानरं होष्यामि । प्रत्येकं रात्रेः पश्चार्धं ममान्नपरिचिन्तनेनैवात्येति—

यातव्यः समयो ब्राह्मो भगवन्नामकीर्तने ।
स याति मन्दभाग्याया ममान्नपरिचिन्तने ॥ १ ॥

आर्यपुत्रस्य तु विपरीता मतिर्जाता । सदैव कर्गजपृष्ठे लेखनीवडवां धावयति, न भोजनस्य चिन्ता न वसनस्य । ज्ञायते तस्य मन इव जाठराग्निरपि शमं यातः । (वेदिकाप्रान्त उपविशति) कियद्वारं मया कथितम्, परन्तु कः शृणोति । महाभाष्यं कः पठिष्यति, यदि स मम वचनं शृणुयात् ? (निःश्वस्य) भगवन् पतञ्जले, मद्गृहविनाशायैव भवता महाभाष्यं प्राणायि ? (उत्तिष्ठन्ती) जानामि, महत्तममिदं कार्यजातम्, किंतु केवलं महत्त्वेनैवोदरं पूर्यते ? (वेदिकासमीपस्थं जलघटमादाय तुलसीतरुं सिंचन्ती) भगवति तुलसिके, विष्णुप्रिये, त्वमेव मे मनस्तापं संहर !

(उटजं प्रविशति)

(ततः प्रविशति महाराष्ट्रियभूषाविभूषितोऽनन्तः ।)

अनन्तः—(परितो विलोकयन्) अयि, भो ? नागेशभट्टस्येदमेव गृहम् ।

शैव्या—(उटजाभ्यन्तरतः) कोऽत्र भोः ?

अन्नतः—इदमेव गृहं नागेशभट्टस्य ?

शैव्या—(तत एव) आम्, इदमेव ? (द्वार्य्यागत्य) को भवान् ?

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

(अनन्तं दृष्ट्वा) अहो, भ्राता ? (वस्त्रं साधयन्ती तस्य पादावुपस्पृशति)

अनन्तः—(हस्तेन तस्याः शिरः स्पृशन्) सौभाग्यवती भव। शैव्ये, कुशलासि ? (विलोकयन्) किन्त एतादृशी दशा ?

शैव्या—(स्वीयामवस्थां परिलक्ष्य वस्त्रं पुनः साधयन्ती) गृहसम्मार्जनाय मयैषा शाटी परिधत्ता। (संकुचितेव भवति)

अनन्तः—किंतु.................

शैव्या—(मध्य एव) कुशलमत्र, स्वकुलकुशलं कथय ! अपि कुशलिनी माता ?

अनन्तः—कुशलिनः सर्वे। पितरौ त्वामाशीर्वचनं कथयतः। आवुत्तो न दृश्यते ?

शैव्या—स्नातुं गतः, इदानीमेवागच्छति। (वेदिकां प्रदर्श्य) अत्रापविश तावत्।

अनन्तः—(उपविश्य) किमुपवेशनेन, प्रथमं तावदहमपि स्नात्वागच्छामि। (पोटलिकामवतारयति।)

शैव्या—(पार्श्वे उपविशन्ती) क्षणं विश्रम, मार्गक्लममपवार्य गन्तव्यम्।

अनन्तः—व्यपगतो मार्गक्लमः। काशीमागत्य सर्वप्रथमं भगवत्या जान्हव्या पुण्यसलिले स्नातव्यम्। सैव सर्वान्क्लेशानपाकरोति। (पोटलिकातो धौतं दुकूलं च निष्काष्य) गृहाणैतत्। (पोटलिकां तस्या हस्ते ददाति) अहं स्नात्वागच्छामि।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शैव्या—युक्तमेतत्……अहमपि तावद्भोजनं साधयामि ।

(शैव्या पोटलिकां गृह्णाति । अनन्त उत्तिष्ठति । शैव्या पोटलिकामादायोटजं प्रति गच्छति । दर्शकोन्मुखगवाक्षाद्घटिकाश्चालयन्ती दृश्यते ।)

अनन्तः—(वस्त्रं स्कन्धे न्यस्य शनैः शनैर्निर्गच्छन्) अतिदीनेव भगिनी दृश्यते । किं सत्यं तया गृहसम्मार्जनार्थं सा शाटी परिधत्ता, उतैतादृश्येवैतेषां दशा ? (परितो विलोयन्) सर्वत्रैव हि दारिद्र्यस्य साम्राज्यमिव दृश्यते—

जीर्णा पर्णकुटी प्रकामविवरा कालादनाप्तच्छदा ।
दृश्यन्ते घटिका इतस्तत अहो लोलुण्ठिता मूषकैः ॥
चुल्ली चाप्यनवाप्य पाककरणं सम्पूरिता भस्मना ।
क्षुत्क्षामा गृहिणीयमार्तवदना शीर्णैः पटैर्वेष्टिता ॥२॥

उच्चावचतृणदन्तैरुटजस्यास्य हसतीव दारिद्र्यम् ।
भीता तत्परिहासाल्लीनैषा पटेषु जीर्णेषु ॥३॥

(निःश्वस्य) अहो महद्विषमे पतिता मे भगिनी । (निष्क्रान्तः ।)

(ततः प्रविशति हस्ते रिक्तां घटिकामादाय शैव्योटजतः)

शैव्या—(सविषादम्) कथितं तु मया यद्भोजनं साधयामि, परन्तु किमिदानीं पाचयामि । गृहे तु मूषकाः क्षुधा म्रियन्ते । किं भोजयामि भ्रातरम् । (चिन्तयन्ती) मदीयां शाटीं जीर्णां दृष्ट्वैव तेनाशङ्कितम्, भोजनेऽपि व्ययायं दृष्ट्वा किं स विचारयेत ? ……आर्यपुत्रोऽपि किमिद्य विलम्बते । यद्यप्यागतेनापि तेनेदमेवाच्यते—"यदेवास्ति तदेव पाचय"

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

इति, परन्तु गृहे तु किमपि नास्ति…… किं भ्रातुः पुरतो ऽप्यपमानना भविष्यति । (चिबुकं हस्ते न्यस्य विमनास्तिष्ठति ।)

(ततः प्रविशति कमण्डलुहस्तो मलिनधौतं परिधाय किमपि जपन्नागेशः)

नागेशः—(वेदिकामरुहँस्तत्रोपविष्टां शैव्यामालोक्य) भद्रे, किमत्र विषण्णेवोपविष्टासि ?

शैव्या—(मुखमुन्नमय्य) आगतो भवान् ? भ्राताद्य मे समागतोऽस्ति ।

नागेशः—भ्राता ते समागतोऽस्ति ? तत्तत्रको विषादहेतुः ? अपि कुशलं तव मातृकुले ? (कमण्डलुं वेदिकायां न्यस्पति)

शैव्या—कुशलं तत्र, अन्नस्य हेतोस्त्वहं विशीदामि ।

नागेशः—(हसन्) अहो ? एवम् । दैनिकमिदं ते कार्यम् । (वेदिकायामुपविसति)

शैव्या—(सामर्षम्) अलं परिहासेन ? भोजनोपायं विचिन्त्यताम् । भ्राता मे समागतः, तदनुरूपमेव पाकं विधेयम । शाटीं मे जीर्णां दृष्ट्वैव तेन विशङ्कितम्, किंत एतादृशी दशा, भोजनेऽपि व्ययायं दृष्ट्वा किं कथयेत्सः ? कमिदानीमहं तं भोजयामि ?

नागेशः—कथयेत् किम् ? यदेवास्ति तदेव भोजय ! ननु कुत्रास्ति सः ?

शैव्या— स्नातुं गतः, आगच्छत्येव ।

नागेशः—तद्गच्छ, साधय सामग्रीम् । अहं तावत्किमपि लिखामि ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शैव्या—अनेन लेखनेनैव तु मम हृदयं दह्यते !

नागेशः—हँ ? हँ ? हँ ? मा मैवमवादीः ?

शैव्या—वदिष्यामि, अवश्यं वदिष्यामि। भ्राता मे समागतः, भवता च लेखनं चिन्त्यते। सर्वदैवमेव करोति भवान्। भ्राष्ट्रे पतत्वेतादृग्लेखनम्। (सामर्षमुत्तिष्ठति)

नागेशः—(हस्ते गृहीत्वा) अयि, मा रोषं कार्षीः ? गृहाणैतत्।

(पोटलिकां ददाति)

शैव्या—(अवलोक्योपविशन्ती) आनीता भोजनसामग्री ? पूर्वमेव कथं नोक्तम् ? (समुत्सुकेव गृह्णाति)

नागेशः—(तस्यामुद्घाटयन्त्यामेव) अपि दत्तस्त्वयावसरः, यदुच्यासम् ? त्वयात्वागच्छत्येव मयि 'अन्नम्' 'अन्नम्' इति रटनं प्रारब्धम्। (शैव्या पोटलिकामुद्घाट्य तत्रत्यां सामग्रीं दृष्ट्वामर्षाभिभूता भवति।) इदमपि न पृष्टं यत्......

शैव्या—(मध्य एव व्यङ्ग्येन) यत्किमानीतं पोटलिकायाम् ?......अहं पृच्छामि किमिदम् ?

नागेशः—ननु भोजनसामग्री ? (विस्मितो भवति)

शैव्या—भोजनसामग्रीयम् ? (सामग्रीं दर्शयति) गलितं शुष्कं शाकम्। (नासामाकुञ्च्य) पूतिगन्धि पिष्टकम्।

(एकतो निक्षिपति)

नागेशः—(अभिभूय) किं कथयसि भद्रे ?......शिष्यदत्ते वस्तुनि दोषोद्भावनं न कार्यम्। ननु नित्यमेव भुञ्ज्महे वयमेतत्। किमद्य ते विपरीता मतिर्जाता ?

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शैव्या—मम विपरीता मतिर्जाता भवतो वा ? आताद्य मे समागतः,

किमेनदेव सत्रं भोज्यते तम् ? मिषेतेनैवातिथ्यं क्रियते ?

गलितं शुष्कं शाकं पूतिगन्धेनापूरितं पिष्टम् ।

अदृष्टस्नेहलेशं क्रियतेऽद्यानेन चातिथ्यम् ? ॥४।

नागेशः—(शान्त्वयन्) शैव्ये, मा विषण्णा भूः । को नाम न वाञ्छेत्सम्यगातिथ्यमाचरितुम् । किन्तु किं वयं कुर्मः । यदस्ति, तेनैवातिथ्याचरणादृते का गतिः ।

शैव्या—(सानुक्रोशम्) यः खल्विच्छति, तस्य सर्वैव गतिः । परन्तु यो हीच्छेदेव नहि, तस्य किम् ?

नागेशः—तर्हि निर्दिश माम्, येन सम्यगातिथ्यमाचरेम ।

शैव्या—याचतां कश्चित् !

नागेशः—(परितपन्निव) शैव्ये, याच्ञा नाम पुरुषस्यापरो मृत्युः

अथच याचितेऽप्यदत्वे को ह्येतादृग्यो दद्यात् !

अयाचिते यदि भवेन्मृत्युस्तत्तु सुनिश्चितम् ।

याचिते ह्यपमानं स्याज्जीवन्मृत्युरवाप्यते ॥५॥

शैव्या—पण्डिम्मन्यस्य भवतोऽपमानाशङ्का, आश्चर्यमेतत् !

नागेशः—अयमपरो व्यवायः, ये खलु मां सम्मानयन्ति कथं तान्याचेय ! जना 'याचक' इति मां व्यवहरेयुः, किं सुखं तव ?

शैव्या—न मे सुखम्, किन्तु परिस्थितिर्बाधते माम् । (विचिन्त्य) शृणोतु तावत् । काशिराजं कथं न याचते भवान् ? राजनि मोघापि याच्ञा नापमानाय कल्प्यते ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नागेशः—युज्यते, यद्यपि राजानोऽव्ययद्यत्वे भोगपरा एव संजाताः, वैदुष्यं नाभिनन्दयन्ति। अहो ? विधेर्विपरीतता।

लक्ष्मीरासवपानपीडितरसा पीतापि सम्बर्द्धते,
माद्यद्दारवधूपभोगविविधैरामर्दिता हर्षति।
सद्वृत्तैरनुवेलमर्थितफला स्नेहेन संसेविता,
मन्ये वामतयैव चाद्य नियतेराशीर्यते भारती ॥६॥

शैव्ये, मा मां याचतेन लघ्वीकुरु।

शैव्या—(सामर्ष व्यङ्ग्येन) अस्तु, न करोमि। बुभुक्षित एव तिष्ठतु मे भ्राता। लिखतु तावद्भवान्। (सरोषमुत्तिष्ठति)

नागेशः—(स्वगतम्) अहो स्त्रीणां दुराग्रहः ! (शैव्यां प्रति) किमेतया सामग्र्या क्षुन्निवृत्तिर्न भविष्यति ते भ्रातुः ?

शैव्या—(मुखं परिवर्त्य हस्तेन निदर्शयन्ती) यथा भवतां भोजन एव निर्भरो मे भ्राता। विपण्यां बहूनि वस्तूनि सन्ति। परन्त्वेवं कथं न कथयति भवान् "यन्नास्ति मे प्रयोजनं तव भ्रातुरातिथ्ये। मसीकर्गलादीनामपेक्षा स्यात्तदा सर्वं कर्तुं शक्येत। परन्तु मम तु भवता सर्वदैतादृश्येवापेक्षा कृता। किन्नाम सुखं प्राप्तं मया मातृत्सङ्गपरिच्छिन्नयात्रागत्य ?—

न रूक्षं शुष्कं चाप्युदरमितमन्नं ह्यधिगतम्।
न वा वासो लज्जापनुदमुत कालङ्कृतिकथा ॥
स्फुटद्दुःखं भाग्यं निजमिव सिसेवानुदिवसम्।
व्यनैषं निःश्वासैस्तु निश उपधानार्पितमुखी ॥७॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

(सक्रोधं सविषादं चोटजं गच्छति ।)

नागेशः—वार्यते समदो हस्ती वार्यते ज्वलितो दवः ।
नारीणां न तु मूढ़ानां हठः केनापि वार्यते ॥८॥
तद्गच्छामि काशिराजं याचितुमगतिकः ।

(निष्क्रान्तः ।)

(दृश्ये क्षणाय स्तब्धता, विलम्बितलयः)

(ततः प्रविशत्यार्द्रधौतं स्कन्ध आरोप्यानन्तः ।)

अनन्तः—(आर्द्रधौतं वेदिकाच्छदे विस्तारयन्) अहो ! माहात्म्यं काश्याः, यत्रत्याञ्जनान्भगवती जान्हवी स्वाङ्कीकृत्वैव पापेभ्योऽपवारयति । यत्र चायाचितोऽपि भगवान्भूतभावनो जनेभ्यः स्वसायुज्यं ददाति । ...... शैव्ये, ... (उत्तरमप्राप्योटजाभिमुखम्) शैव्ये, भगिनि, क्वासि ? (वेदिकायामुपविशति ।)

शैव्या—(म्लानमुखी शनकैरागत्य) आगतो भ्रातः ?

अनन्तः—भगिनि, पुण्यशीलासि, यद्या त्वया काश्युष्यते । मातापि बहुशः काशीमागन्तुमिच्छति, परन्तु क्वास्माकं भागधेयम् ?

(शैव्या मौनं तिष्ठति)

अनन्तः—(अभिलक्ष्य) अयि कथं विषण्णेवासि ?

शैव्या—(सावधानम्) नास्मि विषण्णा ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अनन्तः—तत्कथं मलिनमिव ते मुखं पश्यामि ?

शैव्या—इत्थमेव ।

अनन्तः—आवुत्तो नागतः ? क्षुधितोऽस्मि । सिद्धं भोजनम् ?

(शैव्या मौनं तिष्ठति)

अनन्तः—(शैव्यामुखं निपुणमवलोक्य) भगिनि, अवश्यमेव त्वं दुःखितासि । मुकुलिताकृतिस्ते प्रकटयति । ननु कथय, का वार्तास्ति ?

(शैव्या विक्षुब्धा भवति)

अनन्तः—(तस्याः शिरः परामृशन्) कथय भगिनि, किन्ते दुखम् । अहं ते भ्राता, भ्रातुः पुरतः कोऽपन्हवः ।......किमावुत्तेन सह कलहो जातः ?

(शैव्या मुखमवगोप्य सोद्वेगं रुदिति)

अनन्तः—अवश्यं कलह एव जातः । आगच्छतु सः, कथयिष्यामि का दशा कृतास्ति भगिन्याः ? न भूषणं न वसनम् । भोजनपानयोर्लक्षणानि त्वस्या मुख एव परिलक्ष्यन्ते । ......धिगेतादृशं कापुरुषम्, यः स्वधर्मपत्नीं भोजनेऽपि परिक्लेश्य कलहयति । पुरुषम्मन्यः क्लीवः सः ।

शैव्या—(उद्विग्ना सती) नहि नहि भ्रातः, मा मैवमवादीः । (सकण्ठावरोधम्) अहमेव मन्दभाग्या, यैकमपि दिनं भ्रातरं भोजयितुमक्षमा । (पुनस्तथैव रुदिति)

अनन्तः—एवम् !......तदलं चिन्तया । अहं त्वेतादृक्कापुरुषस्या-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

न्नं भोक्तुमपि नेच्छामि । ......तिष्ठ त्वम्, एष आनयामि भोजनसामग्रीं विपणिं गत्वा ?

(सवेगं निष्क्रामति)

शैव्या—(मुखमुन्नमय्य तन्निष्क्रमणाभिमुखम्) भ्रातः ! ....गतः ।

—....(निःश्वस्याश्रूणि प्रोञ्छन्ती) भगवति जगदम्बिके ?

पत्यापत्यैर्भ्रातृभिश्च श्वशुरैः पितृभिस्तथा ।
कृष्यमाणं पृथक् स्त्रीणां मन आन्दोल्यते सदा ॥९॥

(विचार्य्यैव) तरलपारदबिन्दुरिव मनः स्त्रीणाम् । यत्खलु मे मनः प्रथमं भ्रातृप्रेमज्योतिषा तरलायितं स्वस्थानात्प्रच्युतमभूत्, इदानीं च पत्यपमानतापेन विक्षुब्धं भवति ।

(विमना इव वेदिकायामुपविशति)

[दृश्ये स्तब्धता । तीव्रलयः]

(ततः प्रविशति पद्भ्यां भूमिं ताडयन्नागेशः)

शैव्या—(पदध्वनिना तदागमनभिलक्ष्योत्तिष्ठन्ती) नन्वागतो भवान् ? अहन्तु......

नागेशः—(क्रोधेन मध्य एव) मौनं तिष्ठ मूढ़े !

शैव्या—(सविनयम्) अलं विवादेन । दुःखितास्मि यदायासितो भवान् ।

नागेशः—विरम चटुले, विरमास्याश्चटुलतायाः । विचारयसि यदा-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नीतानेन भ्रातुरुदरगर्तपूरणार्थं सुस्वादुभोजनसामग्री । तदेवैव चपलयसि ।

शैव्या—नाहं चपलयामि । सत्यं ब्रवीमि, बहु दुःखितास्मि स्वीयेनैतेन दुराग्रहेण । ज्वलत्वेषा जिह्वा या……

नागेशः—(परितपन्निव) शैव्ये, अलं मामया । भ्रातृमुखावलोकनेनैव प्रकटितं ते नारीसुलभं मायाविनीत्वम । मा विवादैर्मे मस्तिष्कं व्याकुलीकुरु । न किमप्यानीतं मया तवभ्रातुरुदरपूरणार्थम् ।

शैव्या—प्रियं मे यन्नानीतं किमपि …… (सपरितापम्) सत्यं मन्दभाग्या नारी या मायाकिङ्कर्य्यपि मायाविनीत्युपहस्यते ।

पत्यापत्यैर्भ्रातृभिश्च श्वशुरैः पितृभिस्तथा ।
कृष्यमाणं पृथङ् नार्य्या मन आन्दोल्यते सदा ॥१०॥

नागेशः—तद्गच्छ, प्रसादय प्रियं भ्रातरम् । किमत्र जल्पसि !

शैव्या—(स्नेहेन) स्वामिन्, मा मामन्यथा गृह्णातु भवान् । भ्राताद्य मे समागत इत्यवश्यं चञ्चलायितं मे मनः, किन्तु यदेष आग्रहो दुराग्रहो वा मया कृतस्तत्सर्वं भवतः सम्मानरक्षार्थमेव । दुर्भाग्यं मे यत्क्लेशितेऽपि भवति तन्न सम्पन्नम् । भोजनमप्राप्येदानीं विपणिं गतो भ्राता । एतत्सर्वं स्वगृहं गत्वा गृहे लोके च कथयेदेव सः । तच्छ्रुत्वा किं तत्रत्यो लोको व्याहरेदिति चिन्तया विशीर्यति मे हृदयम्

(ततः प्रविशति शनैः शनैः रामसिंहः, तरुमूलमाश्रित्य तिष्ठति ।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नागेशः—भ्राष्ट्रे पततु ते भ्राता, सागरे निमज्जतु पृथिवी। न नागेशोऽद्याऽवधि याचितुं गच्छेत्।

यथेच्छं व्याहरेल्लोको मृत्युर्वाद्य भवेत्पुनः।
पदवाक्यप्रमाणज्ञो नागेशो नैव याचताम्॥११॥

रामसिंहः—(सहसोपसृत्य) साधु विद्वन्, साधु! सुसदृशं भणितम्।

नागेशः—(विलोक्य) अये! को भवान्?

रामसिंहः—(प्रणमन्) एष विद्वज्जनकिङ्करो रामसिंहः प्रणमति।

नागेशः—अये! शृङ्गवेरपुराधीशो रामसिंहः, स्वस्ति भवते। आस्यतामाशनमिदम्। (आशनं दर्शयति)

रामसिंहः—भवादृशां विदुषां पुरतो। मादृश उत्तिष्ठन्त एव शोभां लभन्ते।

नागेशः—कथमद्यारिकक्षहुताशनेन पावितं मद्गेहम्? कथं कल्पतरुर्याचकमुपतस्थौ?

रामसिंहः—विनयो हि महान्तमनुगच्छति। अन्यथाधिगतसकलार्थो भवान् 'याचक' इति परिहृतमेतत्।

नागेशः—राजन्, यदि श्रिया समभ्यर्चितो महीपतिर्निर्धनमुपतिष्ठति, तदाश्चर्यमेव।

रामसिंहः—पण्डितश्रेष्ठ अलमाश्चर्येण। सदा हि श्रीमन्तो धीमतां वशम्वदाः।......श्रूयताम्मेऽत्रागमनप्रयोजनम्। भवतोऽधिगतसकलार्थतत्वाया अवधीरितधिषणधिषणाया धियाः, दिगन्तध्वान्तापहृया पीयूषवर्षिण्या कीर्तिकौमुदीप्रभया

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

समावर्जितचित्त एष जनः काशीमुपगतः। ततश्च भवद्दर्शनाभिलाषं हृदि निधाय नौकया जाह्नव्युरसि भ्रममाणेनानेन कूल एकेन नाविकेन सहालपन कश्चिद्ब्राह्मणो दृष्टः। कुतूहलवशाच्च तत्रैव प्रापिता नौ।

नागेशः—ततः ?

रामसिंहः—ततस्तत्र गतस्य मम तयोरालापस्य चरमोंऽशः श्रुतिपथमगात्।

नागेशः—किं सः ?

रामसिंहः—ब्राह्मणस्य तस्य कस्यचित्कथनस्योचरे नाविकेनोमुक्त—"यथा भवानेव नागेशः, यद्भवन्तं निःशुल्कं पारं नयामि" ब्राह्मणेन पृष्टम्— "अपि जानासि त्वं नागेशम्" ? तेनोक्तम्—'को न नागेशपण्डितं जानाति। श्रूयते महान्पण्डितः सः' इत्युक्त्वा स नाविको निर्गतः। ततस्तेन ब्राह्मणेनोक्तम्—"अहो यदेष नाविकोऽपि जानाति, तन्न मूर्खो ब्राह्मण्यवगच्छति"। किञ्चित्तूष्णीं स्थित्वा तेन पुनरुक्तम्—'मानवतां हि याच्ञापरो मृत्युः। तद्गच्छामि गृहाभिमुखमेव' इत्युक्त्वा स ब्राह्मणोऽपि सोद्वेगं निर्गतः।

शैव्या—(जतान्तिकम्) अहो ! आर्यपुत्रस्य माहात्म्यं नाविका अप्यवगच्छन्ति। सम्भाव्यते स ब्राह्मण आर्यपुत्र एवासीत्। वस्तुतो मूर्खास्मि।

रामसिंहः—गते तस्मिन्ब्राह्मणे 'एष एव पदवाक्यप्रमाणज्ञो नागेशः'

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

१४५२ संस्कृत नाटक २७

इति मनसि निश्चित्य किमपि निदिश्यामात्यं परिजनं त्यक्त्वा तमेवानुसरन्नत्रायातः। इदानीं च भवद्दर्शनेनाक्ष्णोः फलं प्राप्यते। (शैव्या विस्मयते लज्जते च)

नागेशः—श्रुतो भवतास्माकं वार्तालापः ?

रामसिंहः—आम् ! अशेषतः, श्रुत्वा चैवं विचार्यते।

पंके निवासं पद्मेभ्यो विद्वद्भ्यश्च दरिद्रताम्।
दत्वा तु विधिना नूनं जाड्यमेव प्रदर्शितम् ॥१२॥

अथवा—

धनान्यविगणय्यैव तिरस्कृत्य सुखानि च।
चिन्तयन्ति परार्थं ये ते जयन्ति मनीषिणः ॥१३॥

(एकतो दुकूले किमप्यादायानन्तः प्रविशति, राजानं दृष्ट्वोपगूढ एव तिष्ठति।)

नागेशः—राजन्, सुविदितमेव सर्वं भवता। धनानि नाम भाग्यविलसितानि विनाशीनि च। तत्र का परिदेवना।

रामसिंहः—युक्तमेतत्, परन्त्वेषान्नचिन्ता लोकैषणां। निघ्नन्ती गभीराध्ययनपरस्य विदुषो बुद्धिं बलाद्व्याकुलयति। तेन च न केवलमध्ययनस्य हानिर्भवति, अपितु तेषाममूल्यनां क्षणानां तेषां विचाराणामाविष्काराणाञ्च हानिर्भवति ये सर्वस्य जनस्य, सर्वस्य राष्ट्रस्य विश्वस्य च सुमहदुपकर्तुं प्रभवन्ति। तत्रास्माकं परिदेवना। (चिन्तयति।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नागेशः—साधु महाराज, साधु ! को हि जननाथं विना जनहितं चिन्तयेत् ।

रामसिंहः—इदमेव विचार्यते 'को हि जननाथं विना जनहितं चिन्तयेत्' । विधेर्विपर्ययादद्यत्वे हि जननाथाः स्वहितैकचिन्तापराः संजाताः, परन्तु ते नावबुद्ध्यन्ति यद्विदुषामेतादृश्यां विपन्नतायां विलुप्तेषु शास्त्रेषु सुनिश्चित एव जनानां श्रेयसो विप्रयोगः । जनानामश्रेयसि राष्ट्रस्य राष्ट्रनायकानां च का कथा ।

नागेशः—सत्यमेतन्महाराज ! किन्तु विधिविलसितेषु किमस्माभिः कर्तुं शक्यते । को जानाति का दशा विदुषां देशेऽस्मिन्भाविनी ।

रामसिंहः—(विचार्य्यैव) विद्वन्, निवेदनीयं किञ्चिदस्ति ।

नागेशः—आदिश्यतां महाराज !

रामसिंहः—सत्यमेतद्यद्—विधिविलसितानि न कोऽपि प्रतिकर्तुं प्रभवति । परन्तु यदेषा दशा भारतेऽद्य विदुषां दृश्यते, न तत्र विधिर्हेतुः, एतत्तु धनाढ्यानां प्रमादलतायाः फलम् । तत्पण्डितश्रेष्ठ, दीयतामवसरो येनायं जन एकमपि विद्वान्समन्नचिन्ताविनिर्मुक्तं विधाय जन्मसाफल्यं प्राप्नुयात् ।

नागेशः—साधु महाराज, साधु ! सुसदृशमेतद्भवतः । परन्तु धनं हि प्रमादमूलम् । प्रमादिनश्च दुर्लभा विद्योपासना । तद्यथा मे विद्योपासनाव्याघातो न स्यात्तथैव भवता प्रयतितव्यम्, उदरो ह्ययं सच्छिद्रभाण्डः, तत्प्रपूरणश्रमे किम् ?

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

रामसिंहः—सहजं खलु विदुषां धनौदास्यम्, किन्तु महामते, विद्यानुरागरञ्जितैषा मेऽभ्यर्थना न तु धनदर्पमूला। व्याजविद्योपासनाया अपि नायं जनः परिहार्यः।

नागेशः—राजन्! जानामि भवतोऽन्तर्गतम्, भवद्वाक्यसुधारस-माधुरीपानेनैव व्यपगता मे मनसः क्षुधा, विद्यारक्षापरा राजानः सन्तीति विज्ञाय को हि नाम विद्वाञ्छास्त्रवर्ती तृप्तिं न प्राप्नुयात्!

रामसिंहः—विद्वन्, नायं जनो निराशः कार्यः। निर्दिश्यतां किमयं करोतु।

नागेशः—राजन्, नाहं भवतः प्रेमप्रवणं चित्तं निराकर्तुमुत्सहे। किन्तु भवद्भावपरितृप्ते मनसि काप्याकांक्षा न विद्यते। तद्ब्राह्मणीयं यत्कामयेत तदेव सम्पादयतु भवान्।

रामसिंहः—(शैव्यां प्रति) मातः, आज्ञापयतु भवती किमहं भवत्याः प्रियमुपकरोमि?

शैव्या—(सलज्जम्) राजन्, अद्यावधि परिक्लिश्यापि मयाद्य सर्वं प्राप्तम्, आर्यपुत्रस्याभ्युदये न मम किमपि प्राप्तव्यमव-शिष्टम्। सफलं मे जीवनम्।

रामसिंहः—समः पीडानुभवो दक्षिणे वामे चाङ्गे। तत्कथमधिगत-सकलार्थस्यार्द्धाङ्गं धनपराङ्मुखं न स्यात् (नागेशं प्रति) विद्वन्, क्षन्तव्योऽयं जनोऽनधिगतभवदाज्ञोऽपि मनस ईप्सितं किमपि चेष्टितुम्। (नेपथ्याभिमुखं) महामात्य, उपस्थाप्यतां पूजासामग्री।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

(ततः प्रविशति स्वर्णमुद्रासंभृतपात्रहस्तो महामात्यः। तत्पृष्ठतश्च पूजासामग्रीं सुबहूनि बहुमूल्यानि रत्नाभरणवस्त्रादीनि चादाय भृत्याः प्रविशन्ति। तैरानीतद्रव्यैस्तत्रत्या सकला भूमिरवकीर्णा भवति। तरुमूलमाश्रितोऽनन्तस्तत्सर्वं दृष्ट्वाश्चर्यचकितो भवति, तेन च तद्दुकूलोपनिबद्धं वस्तुजातं भूमौ निपतति। रामसिंहो गन्धमाल्यादिभिर्नागेशस्य शैव्यायाश्च पूजनं करोति।)

रामसिंहः—ब्रह्मन्, स्वीकरोत्वस्य जनस्य तुच्छमपि प्रेमोपनीतमुपहारं, प्रतिमासं पञ्चशतमुद्रामितां वृत्तिञ्च।

नागेशः—(सगद्गदम्) स्वीकृतं महाराज, भवद्विद्यानुरागोपहृतचेतसा सर्वं स्वीकृतम्।

रामसिंहः—(शैव्यां प्रति) देवि, अनुगृहीतोऽस्मि महाविदुषः मदुपनीतोपहारप्रतिश्रुत्या। इदानीमनुगृह्णातु भवती स्वमनोरथप्रकाशनैः।

शैव्या—राजन् सफलीभूता मे मनोरथाः। तथापीदमस्तु—

परिजनभरणानवाप्तबाध-
विबुधजनाहितमूलवाग्लतेयम्।
मनुजपतिवितानमाप्य शश्व-
ज्जगति फलेत्सुफलानि पुष्पिताग्रा ॥१४॥

रामसिंहः—(प्रणमन्) ब्रह्मन्, योजयाशीर्वादैः, येनायं जनस्तत्रभवत्या मनोभिलषितं पूरयितुं प्रभवेत्।

नागेशः—पूर्णाः सन्तु मनोरथाः!

(पटाक्षेपः)

॥ शम् ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

काव्यसदनम् देवप्रयाग गढ़वाल

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri